# तृतीयः पाठः — गोदोहनम्

## स्मरणीय तथ्य

- निश्चित कार्य को निश्चित समय पर करना ही फलदायी होता है अन्यथा दुष्परिणाम को जन्म देता है।
- प्रस्तुत एकांकी "गोदोहनम्" कृष्णचन्द्रत्रिपाठी महोदय द्वारा रचित एवं 'चतुर्व्यूहम्' पुस्तक से उद्धृत है।
- 'गोदोहनम्' एकांकी में एक ऐसे व्यक्ति का कथानक है जो धनवान् और सुखी बनने की इच्छा से अपनी गाय से एक महीने तक दूध निकालना बन्द कर देता है, ताकि महीने भर के दूध एक साथ निकालकर बेचकर धनवान् बन सके। इस प्रकार एक मास पश्चात् जब वह गाय को दुहने का प्रयास करता है तब अत्यधिक दूध का तो कहना ही क्या, उसे दूध की एक बूँद भी नहीं मिलती, अपितु दूध के स्थान पर गाय के पैरों का प्रहार मिलता है। जिससे आहत होकर वह ज़मीन पर गिर पड़ता है। इस घटना से वहाँ उपस्थित सभी यह समझ जाते हैं कि यथासमय किया हुआ कार्य ही फलदायी होता है। अतः इसमें स्मरणीय बात यह है कि - 'उपायं चिन्तयेत् प्राज्ञस्तथापायं च चिन्तयेत् '।

  अर्थात् बुद्धिमान व्यक्ति, उपाय पर विचार करे ही, परन्तु इसके साथ- साथ अपाय अर्थात् उपाय से होने वाली हानि के विषय में भी अवश्य सोचे। अन्यथा ऐसा उपाय सदैव हानिकारक होता है, जिसके अपाय पर विचार न किया जाए। "अविवेकः परमापदां पदम् "

## बहुविकल्पात्मकाः प्रश्नाः-

**1. का मोदकानि रचयति ?**
क. चन्दनः  ख. मल्लिका
ग. चम्पा  घ. गौरी

**2. मल्लिका कानि रचयति ?**
क. मोदकानि  ख. रोटिकाम्
ग. गृहाणि  घ. फलानि

**3. मल्लिका कथं शिवस्तुतिं करोति ?**
क. कूर्दित्वा  ख. हसित्वा
ग. मन्दस्वरेण  घ. उच्च- स्वरेण

**4. कः मोदकं गृहीतुम् इच्छति ?**
क. मङ्गलः  ख. सोहनः
ग. चन्दनः  घ. मल्लिका

**5. 'अहा! सुगन्धस्तु मनोहरः' इति कः कथयति?**
क. चन्दनः  ख. कुम्भकारः
ग. वृद्धा  घ. बालिका

**6. मल्लिका सखिभिः सह कुत्र गच्छति ?**
क. रजरप्पा-मन्दिरम्
ख. काशीविश्वनाथ-मन्दिरम्
ग. देवघर-मन्दिरम्
घ. वासुकीनाथमन्दिरम्

**7. मोदकानि कस्याः निमित्तानि सन्ति?**
क. क्रीडायाः  ख. दानाय
ग. पूजायाः  घ. दर्शनाय

**8. मल्लिका पूजां समाप्य कदा प्रत्यागमिष्यति ?**
क. सप्ताहान्ते  ख. मासान्ते
ग. वार्षिकान्ते  घ. दिनान्ते

**9. मल्लिका कस्य यात्रा गता ?**
क. धर्मस्य  ख. शयनस्य
ग. भ्रमणस्य  घ. मिलनस्य

**10. उमायाः चन्दनेन सह कीदृशः सम्बन्धः ?**
क. भ्राता  ख. पिता
ग. मित्रतायाः  घ. मातुलस्य

**11. 'अत एव दुग्धं शुष्कं जातं' अस्मिन् वाक्ये विशेष्य-पदं किम्?**
क. अत एव  ख. शुष्कम्
ग. दुग्धम्  घ. जातम्

**12. 'आम् भर्तः! सत्यमेव।' अत्र संबोधन-पदं किम्?**
क. आम्  ख. भर्तः!
ग. सत्यम्  घ. एव

**13. कस्य गृहे महोत्सवः आसीत् ?**
क. ग्रामप्रमुखस्य  ख. मल्लिका- गृहे
ग. कुम्भकारस्य  घ. चंदनस्य

**14. 'निर्धनः' इत्यस्य विलोमपदं किं प्रयुक्तम्?**
क. परिश्रमः  ख. धनिकः
ग. विद्वान्  घ. ज्ञानी ।

**15. 'गाम्' इत्यस्य पर्याय-पदं किं प्रयुक्तम् ?**
क. धेनुम्  ख. वृषभः
ग. गजः  घ. अश्वः

**16. 'नत्वा' इत्यस्मिन् अर्थे अत्र किं पदं प्रयुक्तम् ?**
क. प्रणम्य  ख. आगत्य
ग. धावित्वा  घ. विजित्य

**17. 'नन्दिन्याः' इत्यस्मिन् पदे का विभक्तिः ?**
क. प्रथमा  ख. द्वितीया
ग. षष्ठी  घ. चतुर्थी

**18. 'मा स्पृश! एतानि मोदकानि।' अत्र `एतानि' पदं केभ्यः प्रयुक्तम् ?**

क. मा　　ख. स्पृश!

ग. मोदकेभ्य:　　घ. मल्लिकायै

**19. 'अत्युत्तमः विचारः' अत्र विशेषण-पदं किम् ?**

क. अति　　ख. उत्तमः

ग. अत्युत्तमः　　घ. विचारः

**20. 'एकत्र रिक्ताः नूतनघटाः सन्ति।' अत्र 'सन्ति ' इति क्रिया-पदस्य कर्तृपदं किम् ?**

क. एकत्र　　ख. रिक्ताः

ग. अस्मि　　घ. नूतनघटाः

**21. 'आगत्य ' इत्यस्य प्रकृति - प्रत्ययःपृथक् करणीयः।**

क. गम् +क्त्वा　　ख. आ+गम्+ल्यप्

ग. आग+त्य　　घ. आ+गत्य

**22. 'अधुना + एव' अत्र सन्धिः अस्ति -**

क. अधुनाएव　　ख अधुनैव

ग. अधोनव　　घ. अधुनाव

**23. 'नमस्करोमि' इत्यस्य सन्धि-विच्छेदः कः?**

क. नमस+करोमि　　ख. नमौ +करोमी

ग. नमः+करोमि　　घ. नम + करोमी

**24. कः दुग्धपात्रेण सह पतति ?**

क. चन्दनः　　ख. मल्लिका

ग. कुम्भकारः　　घ. उमा

**25. ग्रामप्रमुखस्य गृहे कति सेटकस्य दुग्धस्य आवश्यकता आसीत् ?**

क. चतुर्सेटकस्य　　ख. त्रिशत-सेटकमितस्य

ग. पञ्चशतसेटकस्य　　घ. एकशतसेटकस्य

**26. 'चन्दनः पात्रेण सह पतति' अस्मिन् वाक्ये अव्यय-पदं किम् अस्ति?**

क. पात्रेण　　ख. सह

ग. पतति　　घ. गच्छ

**27. कः अवदत् - "आयामि नाथ! दोहनम् आरभस्व तावत्"**

क. मल्लिका　　ख. उमा

ग. कुम्भकारः　　घ. चंदनः

**28. 'धेनुः पृष्ठपादेन प्रहरति' अत्र क्रिया-पदं किम् ?**

क. प्रहरति　　ख पृष्ठः

ग. पादेन　　घ. धेनुः

**29. पादप्रहारेण ताडयित्वा चन्दनं का रक्तरञ्जितं करोति ?**

क. मल्लिका　　ख. नन्दिनी

ग. उमा　　घ. गौरी

**30. कथं कार्यं विधातव्यम् ?**

क. अविचार्य　　ख. सुविचार्य

ग. झटिति　　घ. आलस्येन

## बहुविकल्पात्मक-प्रश्नानाम् उत्तराणि

1. ख. मल्लिका
2. क. मोदकानि
3. ग. मन्दस्वरेण
4. ग. चन्दनः
5. क. चन्दनः
6. ख. काशीविश्वनाथ-मन्दिरम्
7. ग. पूजायाः
8. क. सप्ताहान्ते
9. क. धर्मस्य
10. घ. मातुलस्य
11. ग. दुग्धम्
12. ख. भर्तः!
13. क. ग्रामप्रमुखस्य
14. ख. धनिकः
15. क. धेनुम्
16. क. प्रणम्य
17. ग. षष्ठी
18. ग. मोदकेभ्य:
19. ग. अत्युत्तमः
20. घ. नूतनघटाः
21. ख. आ+गम्+ल्यप्
22. ख. अधुनैव
23. ग. नमः+करोमि
24. क. चन्दनः
25. ख. त्रिशत्-सेटकमितस्य
26. ख. सह
27. क. मल्लिका
28. क. प्रहरति
29. ख. नन्दिनी
30. ख. सुविचार्य

## अतिलघूत्तरीया: प्रश्ना:

### एकपदेन उत्तरत

1. मल्लिका पूजार्थं सखीभिः सह कुत्र गच्छति स्म ?
2. उमायाः पितामहेन कति सेटकमितं दुग्धम् अपेक्ष्यते स्म ?
3. कुम्भकारः घटान् किमर्थं रचयति ?
4. कानि चन्दनस्य जिह्वालोलुपतां वर्धन्ते स्म ?
5. नन्दिन्याः पादप्रहारैः कः रक्तरञ्जितः अभवत् ?

6. एकत्र रिक्ताः के सन्ति ?

7. 'निकटम्' इत्यर्थे कः शब्दः?

8. कः चीत्कारं कुर्वन् पतति?

9. कुम्भकारः किमर्थं घटनिर्माणं करोति स्म?

10. सर्वे आश्चर्येण कं पश्यन्ति?

11. धेनुः किमर्थं अनुमतिम् एव न ददाति?

12. नन्दिनी केन ताडयित्वा चन्दनं रक्तरञ्जितं करोति?

13. कुम्भकारः कान् रचयति?

14. सर्वं जीवनं कीदृशं वर्तते?

15. क्षिप्रम् अक्रियमाणस्य कार्यस्य रसं कः पिबति?

## अतिलघूत्तरीय-प्रश्नानाम् उत्तराणि

1. काशीविश्वनाथमन्दिरम्
2. त्रिशत्-सेटकम्
3. जीविकाहेतोः
4. मोदकानि
5. चन्दनः
6. नूतनघटाः
7. समीपम्
8. चन्दनः
9. जीविकाहेतोः
10. चन्दनम्
11. दोग्धुम्
12. पादप्रहारेण
13. घटान्
14. भङ्गुरम्
15. कालः

## लघूत्तरीयाः प्रश्नाः -

### पूर्णवाक्येन उत्तरत

1. मल्लिका चन्दनश्च मासपर्यन्तं धेनोः कथम् अकुरुताम्?
2. कालः कस्य रसं पिबति ?
3. घटमूल्यार्थं यदा मल्लिका स्वाभूषणं दातुं प्रयतते तदा कुम्भकारः किं वदति?
4. मल्लिकया किं दृष्ट्वा धेनोः ताडनस्य वास्तविकं कारणं ज्ञातम् ?
5. मासपर्यन्तं धेनोः अदोहनस्य किं कारणमासीत् ?

**रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

6. मल्लिका <u>सखीभिः</u> सह धर्मयात्रायै गच्छति स्म ।
7. चन्दनः दुग्धदोहनं कृत्वा एव <u>स्वप्रातराशस्य</u> प्रबन्धम् अकरोत् ।
8. <u>मोदकानि</u> पूजानिमित्तानि रचितानि आसन् ।
9. मल्लिका स्वपतिं <u>चतुरतमं</u> मन्यते ।
10. <u>नन्दिनी</u> पादाभ्यां ताडयित्वा चन्दनं रक्तरञ्जितं करोति।

## लघूत्तरीयाः प्रश्नानाम् उत्तराणि

1. मल्लिका चन्दनश्च मासपर्यन्तं धेनुं घासादिकं गुडादिकं च भोजयतः । कदाचिद् विषाणयोः तैलं लेपयतः, तिलकं धारयतः, रात्रौ नीराजनेनापि तोषयतः।
2. कालः क्षिप्रमक्रियमाणस्य आदानस्य, प्रदानस्य कर्तव्यस्य च कर्मणः रसं पिबति ।
3. घटमूल्यार्थं यदा मल्लिका स्वाभूषणं दातुं प्रयतते तदा कुम्भकारः वदति "पुत्रिके! नाहं पापकर्म करोमि। कथमपि नेच्छामि त्वाम् आभूषणविहीनां कर्तुम् । नयतु यथाभिलषितान् घटान् दुग्धं विक्रीय एव घटमूल्यं ददातु।"
4. मल्लिकया दुग्धहीनतां दृष्ट्वा धेनोः ताडनस्य वास्तविकं कारणं ज्ञातम् ।
5. मासपर्यन्तं धेनोः अदोहनस्य कारणं ग्रामप्रमुखस्य गृहे त्रिशतसेटकमितं दुग्धप्रदानम् आसीत् ।

**रेखाङ्कित-पदेषु प्रश्न-निर्माणम्-**

6. मल्लिका <u>काभिः</u> सह धर्मयात्रायै गच्छति स्म ?
7. चन्दनः दुग्धदोहनं कृत्वा एव <u>कस्य</u> प्रबन्धम् अकरोत् ?
8. <u>कानि</u> पूजानिमित्तानि रचितानि आसन् ?
9. मल्लिका स्वपतिं <u>कीदृशं</u> मन्यते ?
10. <u>का</u> पादाभ्यां ताडयित्वा चन्दनं रक्तरञ्जितं करोति ?

## दीर्घोत्तरीय-प्रश्नाः

1. 'संस्कृतभाषायाः महत्त्वम् ' इति विषयम् आधृत्य संस्कृतभाषायाम् एकम् अनुच्छेदं लिखन्तु ।
2. घटनाक्रमानुसारं वाक्यानि लिखत-
   (क) सा सखीभिः सह तीर्थयात्रायै काशीविश्वनाथमन्दिरं प्रति गच्छति ।
   (ख) उभौ नन्दिन्याः सर्वविधपरिचर्यां कुरुतः ।
   (ग) उमा मासान्ते उत्सवार्थं दुग्धस्य आवश्यकताविषये

चन्दनं सूचयति ।

(घ) मल्लिका पूजार्थं मोदकानि रचयति ।

(ङ) उत्सवदिने यदा दोग्धुं प्रयत्नं करोति तदा नन्दिनी पादेन प्रहरति ।

(च) कार्याणि समये करणीयानि इति चन्दनः नन्दिन्याः पादप्रहारेण अवगच्छति ।

(छ) चन्दनः उत्सवसमये अधिकं दुग्धं प्राप्तुं मासपर्यन्तं दोहनं न करोति ।

(ज) चन्दनस्य पत्नी तीर्थयात्रां समाप्य गृहं प्रत्यागच्छति।

**3. चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया पञ्चसु संस्कृतवाक्येषु वर्णनं कुरुत-**



| |
|---|
| सरोवरः, त्रयः जनाः, खगाः, अत्र, वृक्षेषु, मीनाः, वनस्य, अपि, पत्राणि, समीपे, तरन्ति, कलरवम्, वने, च, स्नानम्, कुर्वन्ति, कूजन्ति, उपतिष्ठन्ति |

## दीर्घोत्तरीय-प्रश्नानाम् उत्तराणि

**(संस्कृत-भाषाया: महत्त्वम्)**

'सम्+कृ +क्त' इति 'संस्कृतम्'। संस्कृत-शब्दस्य अर्थः शुद्धं परिष्कृतं वा।

संस्कृत - भाषा सर्वासां भाषाणां जननी। संस्कृतभाषायाम् एव चत्वारः वेदाः सन्ति।

रामायणं, महाभारतं, अष्टादश-पुराणानि च सर्वाणि संस्कृते एव सन्ति।

इयम् एका वैज्ञानिक-भाषा अस्ति। आयुर्वेद-धनुर्वेद-योगशास्त्र-इत्यादीनि शास्त्राणि च संस्कृते एव प्राप्यन्ते। पाणिनि-व्याकरणं तु विश्व-विख्यातं वर्तते। संस्कृतभाषायाम् अनेके विद्वांसः जाताः।

वाल्मीकिः व्यासः कालिदासः भासः माघः इत्यादयः महाकवयः जाताः। भारतीय-भाषाणां उत्पत्तिः तु संस्कृत - भाषायाः एव जाता। वस्तुतः इयं भाषा देवभाषा अस्ति, अत एव अस्माभिः पठनीया।

2. घटनाक्रमानुसारेण वाक्यानि -

(क) मल्लिका पूजार्थं मोदकानि रचयति ।

(ख) सा सखीभिः सह तीर्थयात्रायै काशीविश्वनाथमन्दिरं प्रति गच्छति ।

(ग) उमा मासान्ते उत्सवार्थं दुग्धस्य आवश्यकताविषये चन्दनं सूचयति ।

(घ) चन्दनः उत्सवसमये अधिकं दुग्धं प्राप्तुं मासपर्यन्तं दोहनं न करोति ।

(ङ) चन्दनस्य पत्नी तीर्थयात्रां समाप्य गृहं प्रत्यागच्छति।

(च) उभौ नन्दिन्याः सर्वविधपरिचर्यां कुरुतः ।

(छ) उत्सवदिने यदा दोग्धुं प्रयत्नं करोति तदा नन्दिनी पादेन प्रहरति ।

(ज) कार्याणि समये करणीयानि इति चन्दनः नन्दिन्याः पादप्रहारेण अवगच्छति ।

3. चित्रं दृष्ट्वा संस्कृतभाषायाम् पञ्च-वाक्यानि -

क. इदं सरोवरस्य चित्रम् अस्ति।

ख. चित्रे त्रयः जनाः स्नानं कुर्वन्ति।

ग. वृक्षेषु खगाः कलरवं कुर्वन्ति।

घ. सरोवरे द्वौ बालकौ तरतः।

ङ. जले मीनाः अपि तरन्ति।